International Journal of Multidisciplinary Horizon

ISSN: 3049-2017
IJMH 2026; 3(5): 44-46
© 2026 IJMH
www.themultijournal.com
Received: 29-08-2026
Accepted: 19-09-2026
Publish : 21-09-2026

**नारायण-चन्द्रः मेठ्याः**
शोधकर्ता,
वेलुडमठस्थितस्य रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य,
संस्कृत दर्शन विभागे,हाओडामण्डले,
पश्चिमवङ्गेषु, ७११२०२

**गोपी-कृष्णन्-रघुः**
सहायकाध्यापकः
वेलुडमठस्थितस्य रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य,
संस्कृत दर्शन विभागे,हाओडामण्डले,
पश्चिमवङ्गेषु, ७११२०२

Correspondence:
**नारायण-चन्द्रः मेठ्याः**
शोधकर्ता,
वेलुडमठस्थितस्य रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य,
संस्कृत दर्शन विभागे,हाओडामण्डले,
पश्चिमवङ्गेषु, ७११२०२

# सत्कार्यवादः

**नारायण-चन्द्रः मेठ्याः गोपी-कृष्णन्-रघुः**

**शोधसारः—** भारतीयदर्शनेषु सत्कार्यवादः सुप्रसिद्धः। स च वादः सांख्यतत्वविद्भिः स्वीक्रियते। कश्च स सत्कार्यवादः इति चेत् कार्यम् उत्पत्तेः पूर्वमपि सदेवेति। शून्यवादिनः बौद्धाः वदन्ति कारणं भवति अभावात्मकम् असत्, तस्मात् असतः सत् कार्यम् उत्पद्यते। नैयायिकवैशेषिकाः च वदन्ति उत्पत्तेः पूर्वं कार्यम् अविद्यमानं भवति। अतः नूतनमेव कार्यं कारणात् जन्यते इत्यतः ते असत्कार्यवादिनः इति कथ्यन्ते। अद्वैतिनः च वदन्ति कारणमेव सत्, ततः च सतः कारणात् अनिर्वचनीयं कार्यम् उत्पद्यते इत्यतः ते विवर्तवादिनः इति कथ्यन्ते। तदा सांख्याः वदन्ति उत्पत्तेः पूर्वं कारणे कार्यम् अव्यक्तरूपेण भवति इत्यतः ते सत्कार्यवादिनः इति कथ्यन्ते। यथा— तैलम् उत्पद्यते यदा तदा तैलं तिलेषु पूर्वतः एव वर्तते।

**कूटशब्दाः—** सत्कार्यवादः (*satkāryavādaḥ*), असदकरणात् (*asadakaraṇāt*), सांख्यमतम् (*sāṃkhyamatam*), उपादानग्रहणात् (*upādānagrahaṇāt*), सर्वसम्भवाभावात् (*sarvasambhavā-bhāvāt*), कारणभावात् (*kāraṇabhāvāt*)

**१. भूमिका—** भारतीयदार्शनिकाः आस्तिक-नास्तिकभेदेन द्विधा भिद्यन्ते। ईश्वरं ये स्वीकुर्वन्ति ते आस्तिकाः, ईश्वरं ये न स्वीकुर्वन्ति ते नास्तिकाः इति न। अपि तु वेदस्य प्रामाण्यं ये स्वीकुर्वन्ति ते आस्तिकाः, ये च वेदस्य प्रामाण्यं नाङ्गीकुर्वन्ति ते नास्तिकाः। तथाह्युच्यते—

**"योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद्द्विजः।**
**स साधुभिर्बहिष्कार्यो नास्तिको वेदनिन्दकः"॥**[1] इति।

तत्र पुनः आस्तिकदर्शनेषु सांख्यदर्शनं प्रामुख्यं भजते। तत्र पुनः सांख्यदर्शने सत्कार्यवादः प्रामुख्यं भजते। "संख्या बुद्धिर्ज्ञानम्" इति कोशवाक्यमाश्रित्य ज्ञानपरो भवति सांख्यशब्दोऽयम्। अतः उच्यते— संख्यामधिकृत्य प्रवृत्तं शास्त्रं सांख्यमभिधीयते इति। तस्मादेव सांख्यशास्त्रस्य अपरं नाम ज्ञानशास्त्रम् इत्यपि प्रथितम्। सांख्यदर्शनस्य मुख्य आधारो भवति सत्कार्यवादः। कारणवादप्रसङ्गे सिद्धान्तद्वयम् अत्यन्तं प्रसिद्धम्। तद्यथा—सत्कार्यवादः असत्कार्यवादश्च। सांख्यतत्त्वकौमुदीकारः वाचस्पतिमिश्रः स्वकृतग्रन्थे कारणवादप्रसङ्गे चतुरः पक्षान् उक्तवान्। ते चत्वारः पक्षाः हि—असतः सज्जायते, सतः असज्जायते, एकस्य सतो विवर्तः, सतः सज्जायते चेति। एते पक्षाः क्रमेण उच्यन्ते—

**असतः सज्जायते**—असतः सज्जायते इति बौद्धानां मतम्। तेषां शून्यवादिनां बौद्धानां मते अभावात् भावरूपस्य कार्यस्य उत्पत्तिर्भवति। यतो हि तेषां मते सर्वे भावपदार्थाः क्षणिकाः। तद्यथा—बीजनाशे अङ्कुरोत्पत्तिरिति।

**सतः असज्जायते**—सतः असज्जायते इति न्यायवैशेषिकाचार्याणां मतम्। कार्यस्य सर्वथा नूतनारम्भं मनुते मतमिदम्। तद्यथा—सद्रूपेभ्यः परमाणुभ्यः इदम् असद्भूतं जगदुत्पद्यते। अर्थात् परमाणुः सत्, अन्यत् सर्वम् असदिति एषां मते।

**एकस्य सतो विवर्तः**—एकस्य सतो विवर्तः इति वेदन्तिनां मतम्। अत्र च यद् अवस्तु, ततः अन्यस्य वस्तुनः उत्पत्तिर्न सम्भवति। एषां मते च सद्रूपाद् ब्रह्मणः एव जगदिदं विवर्तरूपम्। अर्थात् गोचरभूतस्य जगतः विवर्तरूपेण प्रतीतिर्भवति। एकस्यैव ब्रह्मणः अतात्त्विकप्रतीते सति अस्य जगतः आभासो भवति। विवर्तविषये उच्यते—

**"सतत्त्वतोऽन्यथाप्रथा विकार इत्युदीरितः।**
**अतत्त्वतोऽन्यथाप्रथा विवर्त इत्युदीरितः"**[2] ॥इति।

**सतः सञ्जायते**—सतः सञ्जायते इति भवति सांख्याचार्याणां मतम्। मतेऽस्मिन् कथ्यते—सतः वस्तुनः एव सत् वस्तु जायते उत्पद्यते वा। कार्यं वस्तु कारणवस्तुनि अव्यक्तरूपेण भवतीति। तद्यथा—तिलेषु तैलम् इति। एवं चत्वारः पक्षाः स्पष्टीकृताः।

**२. शोधसमस्या**—यथा शून्यवादिनां बौद्धानां मते असतः कारणात् सञ्जायते, अद्वैतवेदान्तिनां मते सतः अनिर्वचनीयं कार्यम् उत्पद्यते तथा अस्मिन् विषये किं मतम् इति बहुषु ग्रन्थेषु प्रतिपादितम् अस्ति। तथापि बोधे क्लिष्टता अनुभूयते सुकुमारमतिभिः। तेषां सत्कार्यवादबोधरूपसमस्यायाः निराकरणम् अस्मिन् प्रबन्धे क्रियते।

**३. शोधपद्धतिः**— एवं संशये प्रकृतप्रबन्धे मया काचित् प्रक्रिया अवलम्बिता। तत्र प्रथमं सांख्यकारिका, ततः वाचस्पतिमिश्रप्रणीता सांख्यतत्त्वकौमुदी अधीता। ततः प्रसिद्धाः केचन टीकाग्रन्थाः अधीताः। ततः तेभ्यः टीकाग्रन्थेभ्यः मतमाश्रित्य प्रबन्धो लिख्यते मया।

**४.मूलशोधः**—सम्प्रति सत्कार्यवादप्रतिपत्तये आदौ असत्कार्य-वादोक्तो विषयः उच्यते— कार्योत्पत्तेः पूर्वं कार्यं कारणे भवति न वा इति विषये नैयायिकाः, वैशेषिकाः, बौद्धाश्च वदन्ति नेति। कार्योत्पत्तेःः पूर्वं स्वकारणे कार्यं न भवति इति नैयायिकवैशेषिकबौद्धानाञ्च मतम्। यदि कार्योत्पत्तेः पूर्वमेव कार्यसत्ता स्वीक्रियते तर्हि कार्योत्पत्तौ को लाभः, निमित्तकारणानां प्रयोजकत्वं नोत्पद्यते च इति नैयायिकादयः आक्षिपन्ति। यथा—यदि मृदि पूर्वतः एव घटः तिष्ठति तर्हि पुनः घटोत्पादनाय कुम्भकारः दण्ड-चक्र-चीवरादिना किमर्थं चेष्टां कुर्याद् इति।

पुनः यदि घटरूपं कार्यं पूर्वतो यदि उपादानकारणे वर्तमानं भवति तर्हि कार्यकारणभाव एव न सिद्ध्यति। यतो हि तदा मृदो घटस्य च एकैव संज्ञा स्यात्, किञ्च मृदा एव जलानयनरूपं कार्यं स्यात्। किन्तु तद् अनुभवविरुद्धं भवति। मृदा जलानयनं न भवतीति सर्वैरनुभूयमानमस्ति इति तस्याशयः। यदि अत्र तस्य समाधानम् एवमुच्यते- मृदः आकृतिः भिन्ना किञ्च घटस्य आकृतिः भिन्ना इति भिन्नां भिन्नाम् आकृतिमादाय भिन्ना भिन्ना संज्ञा क्रियते तर्हि तदा असत्कार्यवादः सिद्ध्यति। यतो हि तदा सत्कार्यवादिभिः इदं स्वीकर्तव्यं भवति यत् घटरूपे कार्ये या काचित् विशेषाकृतिः अस्ति सा विशेषाकृतिः मृद्रूपे स्वकारणे नास्ति। तेन इदं सिद्ध्यति कार्यम् उत्पत्तेः पूर्वं स्वकारणे अविद्यमानं भवति।

एवं पूर्वपक्षिभिः आक्षेपे कृते सति तेषां मतस्य खण्डनाय सांख्याचार्यैः सत्कार्यविषकं मतम् उपस्थाप्यते—

**"असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात् ।**
**शक्तस्य शक्यकरणात् कारणाभावाच्च सत्कार्यम्॥"**[3] इति।

सत्कार्यवादः असदकरणात्, उपादानग्रहणात्, सर्वसम्भवाभावात्, शक्तस्य शक्यकरणात्, कारणाभावात् इति पञ्चभिः मतैः उपस्थाप्यते। क्रमेण एतेषां मतानाम् आलोचनम् अधः क्रियते—

**असदकरणात्**—उत्पत्तेः पूर्वमपि कार्यस्य सत्ता विद्यमाना भवतीत्यत्र प्रथमो हेतुर्भवति असदकरणादिति। तस्यायमर्थः- असत् अविद्यमानं वस्तु अकरणं- कर्तुं न शक्यते इति। सांख्याचार्याणां मते पूर्वं हि कारकव्यापारात् कार्यम् असद्भूतं भवति चेत् प्रयत्नशतेनाऽपि तत् कर्तुम् अशक्यम् अस्ति। अपि तु कारणे अव्यक्ततया वर्तमानस्य कार्यस्य उत्पादनम् शक्यम् इति। तथाह्युच्यते वाचस्पतिमिश्रेण—

**"असच्चेत् कारणव्यापारात् पूर्वं कार्यं नास्य सत्त्वं कर्तुं केनाऽपि शक्यं, न हि नीलं शिल्पिसहस्रेणाऽपि पीतं कर्तुं शक्यते।"**[4] इति। यथा तिलानां पीडनेन तिलेभ्यः तैलस्य उत्पत्तिर्भवति यतः तिलेषु तैलं सूक्ष्मरूपेण वर्तते, धान्यानाम् अवघातनेन धान्येषु तण्डुलानाम् उत्पत्तिर्भवति यतः धान्येषु तण्डुलानि वर्तन्ते तथैव सिकतानां पीडनेन अवघातनेन वा सिकताभ्यः तैलस्योत्पत्तिर्न भवति। एतेन ज्ञायते तिलादिपदार्थेषु पूर्वतः विद्यमानस्यैव तैलस्य पीडनेन अभिव्यक्तिर्भवति। न तु पूर्वतः अविद्यमानस्य तैलस्य अपूर्वतया उत्पादनं भवतीति।

**उपादानग्रहणात्**—उत्पत्तेः पूर्वमपि कार्यस्य सत्ता विद्यमाना भवतीत्यत्र द्वितीयो हेतुर्भवति उपादानग्रहणाद् इति। उपादानं नाम उपादानकारणं ग्रहणम् नाम कार्येण सम्बन्धः एवं उपादानग्रहणम् उपादानकारणानां कार्येण सम्बन्धः। उपादानकारणेन कार्यस्य सम्बन्धात् अपि ज्ञायते यत् कार्योत्पत्तेः पूर्वमपि कार्यं सदेव। कार्येण सम्बद्धं यत् कारणं तत् भवति कार्यस्य जनकम्। द्विष्ठो भवति सम्बन्धः। यदि कार्यम् असद्रूपं भवति तर्हि एकस्य सम्बन्धिनः कार्यरूपस्य असत्त्वे सति तेन सह कारणस्य संसर्गो नोपपद्यते। अतः असम्बद्धस्य कार्यरूपस्य उत्पादे कारणरूपस्य सामर्थ्यं न स्यात्। तेन ज्ञायते कार्योत्पत्तेः प्रागपि कार्यं सदेव इति। यथा— लोके एवं दृश्यते दध्यर्थिभिः नियमतया दुग्धम् एव उपादीयमानं दृश्यते। एवमेव घटार्थिभिः नियमतया मृत्तिका उपादीयमाना दृश्यते।

**सर्वसम्भवाभावात्**—उत्पत्तेः पूर्वमपि कार्यस्य सत्ता विद्यमाना भवतीत्यत्र तृतीयो हेतुर्भवति सर्वसम्भवाभावाद् इति। कार्येण सम्बद्धं यत् कारणं तत् भवति कार्यस्य जनकम् इति पूर्वं यदुक्तं तत् नाङ्गीकृत्य यदि आक्षेपः क्रियते यत् असम्बद्धमेव कार्यं कारणात् भवतु इति। तदा तस्य मतस्य निराकरणाय उच्यते यदि असम्बद्धकारणाद् असम्बद्धकार्यस्योत्पत्तिः स्वीक्रियते तर्हि यस्मात् कस्मादपि कारणात् कार्यस्य उत्पत्तिः स्यात्। सर्वस्मात् सर्वं कार्यं स्यादिति तस्यार्थः। किन्तु तद् अनुभवविरुद्धम्। तेन मृत्तिकायाः पटस्य किञ्च तन्तुभ्यो घटस्य उत्पत्तिः आपद्येत। तेन ज्ञायते कार्योत्पत्तेः प्रागपि कार्यं सदेव इति। सांख्यवृद्धाश्च कथयन्ति—

**"असत्त्वे नास्ति सम्बन्धः कारणैः सत्त्वसङ्गिभिः।**
**असम्बद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिः॥"**[5] इति।

**शक्तस्य शक्यकरणात्**—उत्पत्तेः पूर्वमपि कार्यस्य सत्ता विद्यमाना भवतीत्यत्र तुर्यो हेतुर्भवति शक्तस्य शक्यकरणाद् इति। यस्य कार्यरूपस्य उत्पादने यथा सामर्थ्यं भवति तथा कारणं तस्मिन् कार्ये शक्तं भवति। ततश्च शक्तात् तस्य शक्तस्य उत्पत्तिः परिलक्ष्यते। अनया रीत्या कार्यकारणयोः शक्यशक्तभावो नियतः अस्तीति ज्ञायते। तस्यायमर्थः कारणसम्बद्धम् एव कार्यं कार्यसम्बद्धेन कारणेन जन्यते न तु असम्बद्धम् असम्बद्धेन कारणेन इति। यदि विविधकारणैः असम्बन्धकार्याणाम् उत्पत्तिः स्वीक्रियते तर्हि सर्वत्र असमीचीना व्यवस्था स्यात्। एवं भवति चेत् सर्वविधकार्याणि सर्वविधकारणैः उत्पद्येरन्। किन्तु तद् अनुभवविरुद्धम् अस्ति। अर्थात् तन्तुभ्यः पट एव जायते न तु घटः। कार्योत्पादिका शक्तिर्हि स्वकारणे भवतीति कारणात् शक्तिः कारणनिष्ठा। तत् कथं ज्ञायते इति चेत् कार्यदर्शनात् तन्तुभ्य एव पटः सुवर्णादेव कुण्डलम् इति प्रतिनियतकार्योत्पत्त्यन्यथानुपपत्तिज्ञानात्। एवं कार्यं स्वकारण-सम्बद्धम् इति दृष्टम्।

कारणाभावात्—उत्पत्तेः पूर्वमपि कार्यस्य सत्ता विद्यमाना भवतीत्यत्र पञ्चमो हेतुर्भवति कारणाभावाद् इति। कारणाभावाद् इत्यस्यार्थो हि कार्यस्य कारणात्मकत्वादिति। कारणात् कार्यं न भिन्नम्, यतो हि कारणं सद्रूपं भवति तस्मात् तदभिन्नं कार्यं कदाचिदपि असद्भूतं न भवति। तत्र च अनुमानम्- 'घटः सदा सन्, कारणाभिन्नत्वात् कारणस्वरूपवत् इति। कार्यं कारणाद् न भिद्यते इत्यत्र प्रमाणं यथा- न पटः तन्तुभ्यो भिद्यते तद्धर्मत्वात्, इह यद् यतो भिद्यते तत् तस्य धर्मो न भवति, यथा गौरश्वस्य, धर्मश्च पटस्तन्तूनां तस्मान्नार्थान्तरम्' इति।

**५.शोधनिष्कर्षः**— उत्पत्तेः पूर्वं कार्यं सद् असद् वा इति प्रश्ने सांख्याः सदेव इति वदन्ति। तन्मतं प्रस्तोतुं च ईश्वरकृष्णः सत्कार्यवादाभ्युपगमे पञ्च कारणानि प्रोक्तवान्। तद्यथा— असदकरणात्, उपादानग्रहणात्, सर्वसम्भवाभावात्, शक्तस्य शक्यकरणात्, कारणभावात् चेति। यद् असत् भवति तत् न क्रियते, उदाहरणं यथा शशविषाणम् इति। इत्यादिक्रमेण ज्ञायते उत्पत्तेः पूर्वं कार्यं सदेवेति।

**६. उपसंहारः**— एवं सांख्याचार्यैः पञ्चभिः कारणैः सत्कार्यवादः प्रतिस्थापितो वर्तते। पञ्च कारणानि तेषाञ्च उदाहरणानि अत्र उपन्यस्तानि। सत्कार्यवादे कार्यम् उत्पत्तेः पूर्वं सद् असद् वेति विचारः कृतो वर्तते। सांख्यदर्शने सत्कार्यवादः, पुरुषस्वरूपम्, व्यक्ताव्यक्तसाधर्म्यम्, व्यक्ताव्यक्तवैधर्म्यम् इत्यादयः बहवो विषयाः सन्ति। तेषु मया केवलं सत्कार्यवादः आश्रितो वर्तते। इतोऽपि अन्ये ये विषयाः सन्ति तानाश्रित्यापि भिन्नं व्याख्यानं सम्भवतीति शम्।

**ग्रन्थसूची**

**(Bibliography)**


1. Miśra, Vācaspati. (1971). Sāṃkhya-tattva-kaumudī: With Tattva Prakāśikā Hindī commentary, notes and preface (G. Ś. Musalgaonkar, Ed.). Chowkhamba Sanskrit Series Office.
2. Vijñānabhikṣu. (1988). Sāṃkhyasāra of Vijñānabhikṣu: Text and translation with notes (S. Kumar, Ed.). Eastern Book Linkers.
3. Vijñānabhikṣu. (1979). Sāṃkhyapravacana-bhāṣya. Motilal Banarsidass.
4. Larson, G. J. (1979). Classical Sāṃkhya: An interpretation of its history and meaning (2nd rev. ed.). Motilal Banarsidass.
5. Sinha, N. (1979). The Sāṃkhya philosophy: Containing the Sāṃkhya-pravacana sūtram, with the vṛtti of Aniruddha and the bhāṣya of Vijñāna Bhikṣu. Oriental Books Reprint Corporation.
6. Nigam, K. P. (1980). Vedāntasāra of Sadānanda. Motilal Banarsidass.
7. Manu. (2003). Manusmṛti: The laws of Manu (G. Bühler, Trans.). Motilal Banarsidass.
8. Yogīndra, Sadananda. (1975). Vedāntasāraḥ: Kaumudīvyākhyopetaḥ (R. Tripathi, Comm.; 3rd ed.). Balakrishna Tripathi.
9. Miśra, Vācaspati. (1971). Sāṃkhya-tattva-kaumudī: With Tattva Prakāśikā Hindī commentary, notes and preface (G. Ś. Musalgaonkar, Ed.). Chowkhamba Sanskrit Series Office.


**पाद टिप्पणी –**

1. मनुस्मृतिः २.११
2. वेदान्तसारः, पत्रसंख्या ५१
3. सांख्यकारिका, श्लोकसंख्या ९, पत्रसंख्या ९०
4. सांख्यतत्तवकौमुदी, पत्रसंख्या ९३
5. सांख्यतत्तवकौमुदी, पत्रसंख्या ९७